# Arjunakritam Surya Stotram 22

# અર્જુનકૃતં સૂર્યસ્તોત્રમ્ ૨૨

## Document Information

Text title : Arjunakritam Surya Stotram 22

File name : arjunakRRitaMsUryastotram22.itx

Category : navagraha, skandapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | AvantyakhaNDa | adhyAya 32/54-86||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

Arjunakritam Surya Stotram 22

# અર્જુનકૃતં સૂર્યસ્તોત્રમ્ ૨૨

અર્જુન ઉવાચ ।
જયતિ કિરણમાલી ભાસુરઃ શ્રાન્તસપ્તિઃ
સકલભુવનધામા પ્રાગ્દિગન્તાટ્ટહાસઃ ।
ભવતિ વિગતપાપં કીર્તનાદેવ યસ્ય
પ્રચુરકલુષદોષૈર્ગ્રસ્તમઙ્ગં નરાણામ્ ॥ ૫૪॥

બ્રહ્માદ્યૈર્મુનિભિરભિષ્ટુતં પતઙ્ગં
કઃ સ્તોતું કવિરભિવાઞ્છતે પ્રકામમ્ ।
સ્તોષ્યેઽહં તદપિ સુવિસ્તરાત્સુબુદ્ધે
કિં દીપો જ્વલતિ હિ નોદિતે શશાઙ્કે ॥ ૫૫॥

શાસ્ત્રાર્થકામનિપુણૈર્મુનિભિઃ સ્તુતસ્ય
કિં વસ્તુ યન્ન રચિતં વિવિધૈઃ પ્રયોગૈઃ ।
દ્વૈપાયનપ્રભૃતિભિર્મુનિભિઃ પુરાણૈ-
રાપીતસારમિહ ભાતિ જગત્સમસ્તમ્ ॥ ૫૬॥

કામં તથાપ્યહમતીવ વિચાર્ય બુદ્ધ્યા
ભાનોસ્ત્રિલોકગુરુપૂજિતપાદયુગ્મમ્ ।
વૃત્તૈઃ સ્ફુટાર્થમધુરાક્ષરસન્ધિયુક્તૈ-
સ્ત્વાં વૈ વિચિત્રગતિભિઃ પરિકીર્તયિષ્યે ॥ ૫૭॥

તાવજ્જગદ્ભવતિ નિશ્ચલમેવ સર્વં
તાવત્ક્રિયાશ્ચ વિવિધા ન ચ યાન્તિ સિદ્ધિમ્ ।
યાવચ્ચ નાથ કમલામલમણ્ડલ ત્વ-
મુત્તિષ્ઠસે વ્યપનયન્કિરણૈસ્તમાંસિ ॥ ૫૮॥

તાવન્ન ભાન્તિ શિખરાણિ મહીરુહાણાં
ગુચ્છૈસ્તુ ફુલ્લવનમીલિતલોચનાનિ ।
સુપ્તાનિ બોધયસિ ષટ્ચરણાકુલાનિ

યાવન્ન ભાભિરમલાભિરનુત્તમાભિઃ ॥ ૫૯॥

ઉદ્યન્તમમ્બરતલે સુરસિદ્ધસઙ્ઘાઃ
સબ્રહ્મદૈત્યમુનિકિન્નરનાગયક્ષાઃ ।
ત્વામર્ચયન્તિ વિબુધાઃ પ્રણતૈઃ શિરોભિ-
શ્ચઞ્ચત્કિરીટમણિભાભિરનુત્તમાભિઃ ॥ ૧.૩૨.૬૦॥

અસ્તં ગતે ત્વયિ જગદ્ભવતિ પ્રસુપ્તં
ભૂયસ્ત્વયિ પ્રતપતિ પ્રતિબોધમેતિ ।
એવં સદા વરદ લોકહિતાર્થહેતો-
રેકસ્ત્વમેવ ભગવંસ્તિમિરસ્ય હન્તા ॥ ૬૧॥

ઉત્સાહશક્તિનયશૌર્યસમન્વિતાનાં
સેવાપ્રયોગરચનાવિધિતત્પરાણામ્ ।
કાર્યાણિ યન્ન ફલદાનિ ભવન્તિ પુંસાં
હેતુસ્ત્વભક્તિરિહ નાથ તવેતિ નૂનમ્ ॥ ૬૨॥

યત્સંયુગેષુ રથકુઞ્જરકુન્તશક્તિ-
નારાચચક્રશરતોમરભીમખડ્ગૈઃ ।
ક્ષિપ્રં નરાઃ સમુપયાન્તિ વિજિત્ય શત્રૂન્
સર્વં સદા પ્રણતવત્સલ વેષ્ટિતં તે ॥ ૬૩॥

કાન્તારદુર્ગવિષમેષ્વપિ વર્તમાના
ઋક્ષેભસિંહબહુકણ્ટકતસ્કરેષુ ।
તૃષ્ણાન્વિતાશ્ચ બહુશોકવિમૂઢચિત્તા-
સ્ત્વત્કીર્તનાદ્ધિ ગતમૃત્યુભયા ભવન્તિ ॥ ૬૪॥

તેજોરાશિસ્ત્વમિહ શરણં સર્વતો દુઃખિતાનાં
ત્વત્તુલ્યોઽન્યો જગતિ સકલે નાસ્તિ કશ્ચિદ્દયાલુઃ ।
ત્વય્યેકસ્મિન્ભવતિ સકલા ભક્તિરન્વિષ્યમાણા
ત્વામાસાદ્ય પ્રભવતિ કુતો વ્યાધિદુઃખં નરાણામ્ ॥ ૬૫॥

કઃ કુષ્ઠાભિહતઃ ક્વ ચારિભિરથો કો વ્યાધિભિઃ પીડિતઃ
કે પઙ્ગ્વન્ધજડાઃ ક્વ શીર્ણચરણઃ કો વા વિપન્નક્રિયઃ ।
ઇત્યેવં પ્રસમીક્ષ્ય દેવ કૃપયા દોષાત્પરિત્રાયસે
કસ્યાન્યસ્ય પરોપકારનિરતા ચેષ્ટા યથૈષા તવ ॥ ૬૬॥

ધર્મઃ પરત્ર કિલ તિષ્ઠતિ સેવિતોઽસૌ
કાલાન્તરેણ વિબુધા વરદા ભવન્તિ ।
ત્વં સેવિતઃ પ્રણતવત્સલ ભૂતિકામૈઃ
સદ્યઃ પ્રયચ્છસિ ફલં યદભીપ્સિતં તૈઃ ॥ ૬૭॥

વિભ્રાન્તકાન્તહરિણીસદૃશેક્ષણાભિઃ
કાન્તોરુહારમણિકુણ્ડલમેખલાભિઃ ।
તેષાં ભવન્તિ ભવનાનિ વિલાસિનીભિ-
ર્યેષાં નૃણાં ત્વમસિ વૈ વરદઃ પ્રસન્નઃ ॥ ૬૮॥

યૈસ્ત્વં નરૈઃ સકૃદપિ પ્રણતઃ કથઞ્ચિત્
ધ્યાતોઽથવા ભુવનનાથ તથાન્તકાલે ।
નિષ્કલ્મષા જગતિ દુષ્કૃતિનો ભવન્તિ
તે નિર્મલાઃ સુકૃતિનો ગતિમાપ્નુવન્તિ ॥ ૬૯॥

યે ત્વાં કુતર્કમતિભિર્ન નમન્તિ ભક્ત્યા
રોમાઞ્ચકઞ્ચુકશતાકુલિતૈઃ શરીરૈઃ ।
તે નિર્ધનાઃ પરગૃહેષ્વવભૂતમન્નં
ક્ષુત્ક્ષામકણ્ઠવદનાઃ પરિતર્કયન્તિ ॥ ૧.૩૨.૭૦॥

ઉદધિજલતરઙ્ગક્ષોભલોલાક્ષિયુગ્મૈઃ
સફણિમણિમયૂખોદ્ભાસિતૈર્લેલિહદ્ભિઃ ।
પ્રણિપતિતશિરોભિર્નાગમુખ્યૈરજસ્રં
શ્રુતિભિરનુપમાભિઃ સ્તૂયસે પુષ્કલાભિઃ ॥ ૭૧॥

તવ સુરવર ગચ્છતોઽનુસરન્તિ
ત્રિદશનદીકમલોદ્ધતાનિ વાતૈઃ ।
કનકકમલરેણુપિઞ્જરિતાનિ
ભ્રમરકુલાનિ પતઙ્ગ ચામરાણિ ॥ ૭૨॥

તત્ત્વધ્યાનં જલનિધિનિવહે સ્થિત્વા સ્થિત્વા ચરણનિવહૈઃ ।
આજીવાર્થં પ્રતપસિ ભગવન્કસ્તે તુલ્યસ્ત્રિભુવનસમયે ॥ ૭૩॥

ઉદયાદ્રિનિતમ્બસંસ્થિતસ્ય હ્યુદયેષ્વસ્તમયેષુ ચાવૃતસ્ય ।
કિરણાસ્તપનીયસપ્રભાસ્તે વિલસન્તસ્તડિતો વિડમ્બયન્તિ ॥ ૭૪॥

યથા યથા વ્રજતિ રથસ્તવામ્બરે વિપાટયન્ઘનતિમિરૌઘસઞ્ચયાન્ ।

તથા તથા ક્ષુભિતમહાનિલાસૃતં પ્રતીયતે મુહુરિવ દુન્દુભિર્યથા ॥ ૭૫॥

ચારુપદ્મવિનિમીલિતેક્ષણાં ચક્રવાકકલહંસમેખલામ્ ।
કામિનીમિવ રતિશ્રમાલસાં તાં વિબોધયસિ પદ્મિનીં કરૈઃ ॥ ૭૬॥

નીલલોલમતિકાન્તમુત્પલં ભૃઙ્ગતુઙ્ગચરણાકુલીકૃતમ્ ।
ત્વત્પ્રભાભિરનુરાગરઞ્જિતં પદ્મરાગમિવ શોભતે ભૃશમ્ ॥ ૭૭॥

સ્ફુરચ્છશાઙ્કહારનિર્મલં ત્વદંશપૂરિતમ્ ।
વિભાત્યતીવ કાન્તમમ્બરં બૃહચ્ચ પાટલમ્ ॥ ૭૮॥

હરિસિ ત્વમેવ તાપમિહ તાવદુદેત્ય નૃણાં
ભવતિ ચ યાવદેવ કિરણૈસ્તવ પૂર્ણમિદમ્ ।
ઋષિભિર્મુનિભિરુદારધીભિઃ શાશ્વતમાર્ગપરૈર્વરદ
ન શક્યતે તવ ગુણસ્તુતિરાશ્રયિતુમ્ ॥ ૭૯॥

ત્વં વિષ્ણુસ્ત્વં શશાઙ્કસ્ત્વમસુરમથનઃ શણ્મુખસ્ત્વં ધનેશ-
સ્ત્વં કાલસ્ત્વં ચ ધાતા ક્ષિતિધરમલયાપાશ્રયસ્ત્વં હુતાશઃ ।
ઓઙ્કારસ્ત્વં દ્વિજાનાં ત્વમિહ જલનિધિત્વં શરસ્ત્વં ચ રુદ્ર-
સ્ત્વં મુખ્યસ્ત્વં પયોદો વ્રતયમનિયમાસ્ત્વં જગત્સર્વમેવ ॥ ૧.૩૨.૮૦॥

ત્વમનિન્ધ ગોપતે ત્રિપુરમથન મન્મથ-
દાહકરસ્ત્વમસુરભીમદર્પહા પાહિ મામ્ ।
ત્રિદશાધિપકમલવરાનનસ્ત્વમિહ દેવગુરુર્ભગવાં-
સ્ત્રિભુવનમણ્ડલેઽસ્તિ કતમસ્તવ તુલ્યગુણઃ ॥ ૮૧॥

આદિત્ય ભાસ્કર દિવાકર સપ્તસપ્તે
માર્તણ્ડ સૂર્ય હરિદશ્વપતે ચ ભાનો ।
અશ્રાન્તવાહન ખરુપ ગભસ્તિમાલિં-
સ્ત્વાં લોકનાથ શરણં પ્રતિપદ્યતેઽસૌ ॥ ૮૨॥

પ્રાગ્દિગ્વધૂતિલકભાસુરકર્ણપૂર-
મન્દાકિનીદયિતનાથ જગત્પ્રદીપ ।
હેમાદ્રિતાપન નભસ્તલહારિરત્ન-
સન્ધ્યાઙ્ગનાવદનરાગ નમો નમસ્તે ॥ ૮૩॥

બ્રહ્મૈવ સત્યશુભમઙ્ગલલોકનાથ
વ્યોમામ્બુજેશ મુનિસંસ્તુત વિશ્વમૂર્તે ।

આર્તસ્ય શોકહર કિઙ્કરપાલકશ્ચ
ત્વં મે પ્રસીદ ભગવચ્છરણાગતસ્ય ॥ ૮૪॥

કૃત્વાઞ્જલિં શિરસિ પઙ્કજકુડ્મલાભં
યત્સંસ્તુતસ્ત્વમિહ દેવ મયાદ્ય ભક્ત્યા ।
તેન પ્રભો ભવ મમોપરિ સૌમ્યમૂર્તિ-
ર્ધર્મે મતિં કુરુ સદા શ્રિયમૂર્જિતાં ચ ॥ ૮૫॥

નમઃ સવિત્રે જગદેકચક્ષુષે જગત્પ્રસૂતિસ્થિતિનાશહેતવે ।
ત્રયીમયાય ત્રિગુણાત્મધારણે વિરઞ્ચિનારાયણશઙ્કરાત્મને ॥ ૮૬॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે અવન્તીક્ષેત્રમાહાત્મ્યે દ્વાત્રિંશાધ્યાયાન્તર્ગતં
અર્જુનકૃતં સૂર્યસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । આવન્ત્યખણ્ડ । અધ્યાય ૩૨/૫૪-૮૬॥

skandapurANa . AvantyakhaNDa . AvantyakhaNDa . adhyAya 32/54-86..

Proofread by PSA Easwaran

*Arjunakritam Surya Stotram 22*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*